M. T. B. COLLEGE, SURAT

*Manuscripts Library*

No. Ref.

No. Ser. 161

Title: Upanga Lalita Puja

161

| | | |
|---|---|---|
| Upangalalita Pooja | | Title |
| | | Author |
| | | Editor |
| Saka 1687 | | Year, Vols. |
| | | Publisher |
| 161 | | Remarks |

॰ठलि॰ज्ञा॰॥

॥७॥

॥८।

॥ इति पांगवलिलाष्टज्ञा समाप्तः॥

॥७॥

१ श्रीगणेशायनमः ।। ।।अथउपांगललितापूजनं ।।ममसर्वा
भिष्टकामनासिध्यर्थं संमस्तपापक्षयार्थं मनोवांछितकामनासि
ध्यर्थं श्रीउपांगललिताप्रीत्यर्थं यथाशक्त्या यथामीलितोपचारद्रव्यैः ।।
पुराणोक्तमंत्रैश्च वार्षिकपूजांकरिष्ये ।। अथ ध्यानं ।। नीलकौशेयवस
नां हेमाभां कमलासनां ।। भक्तानांवरदानिं ललितायैनमोस्तुते ।।
ध्यानं० ।। आगच्छवरदेदेवीसर्वसंपत्प्रदायिनी ।। यावद्व्रतसमाप्य
तेदेहितं ममसन्निते ।। सहस्रशीर्षो० ।। हिरण्यवर्णा० ।। आवाहनं ।।
कार्तस्वरमयंदिव्यंनानामणिगुणान्वितं ।। अनेकशक्तिसंयुक्तमा १
सनंप्रतिगृह्यतां ।। पुरुषएवेदं सर्वं० ।। तांमआवह० ।। आसनं ।।

गंगादिसर्वतीर्थेभ्यो मयाप्रार्थनयाहृतं ।। तोयमेतत्सुखस्पर्शंपाद्या
र्थंप्रतिगृह्यतां ।। एतावानस्यम० ।। अश्वपूर्वां० ।। पाद्यं ।। निधीनां
सर्वरत्नानांधयुष्यसमन्वितं ।। मयापि भक्त्या ललिते गृहाणार्घ्यं न
मोस्तुते ।। त्रिपादूर्ध्व० ।। कांसोस्मि० ।। अर्घ्यं ।। पाटलोशीरकर्पूरसुरभि
पम स्वादुशीतलं ।। तोयमाचमनीयार्थं शिरिरं प्रतिगृह्यतां ।। तस्माद्विरा० ।।
चंद्रांप्रभासां० ।। आचमनीयं ।। पंचामृतंमयानीतंपयोदधिघृतं
मधु ।। शर्करादिसमायुक्तं स्नानं ।। हिरण्यवर्णां हरिणीं० ।। ममार्थे ज
लमुत्तमं ।। म ~~[illegible]~~ आप्यायस्वेतिपयः ।। दधिक्राव्णइतिदधिः ।।
घृतंमिमिक्षितिघृतं ।। मधुवातेतिमधुः ।। स्वादुःपवस्वेतिशर्करा ।।

इतिपंचामृतस्नानं॥ततःशुद्धोदकस्नानं॥हिरंण्यवर्णांहरिणीं०॥एताभ्यस्त्वाहृतं देविस्नानार्थं ते
गंगासरस्वतीरेवागोदानैवनुर्मानर्मी॥आदित्यवर्णेतपसो०॥स्नानं॥श्रीसूक्तेनअभि
सुरेश्वरी॥यजुरूपेण०॥गणपतिमावाहयामि॥जज्ञानंसत्य०॥ रामूम
षेकः॥गणानां०॥गणपतये०॥जातवेदसे०॥दुर्गामावाहयामि॥
सप्त मातृध्यानं०॥सप्तमातृं आवाहयामि॥स्योना०॥इंद्रंवोविश्व०॥इंद्राय०॥
क्षेत्रस्यपतिना०॥क्षेत्राधिपमावाहयामि॥यमायसोम०॥यमा०॥यमं आवा०॥ २॥
अग्निंदूतंवृणी०॥अग्नये०॥अग्निमावा०॥
मोषुणःपरा०॥निर्ऋतये०॥निर्ऋती०॥तत्वायामि०॥वरुणाय०॥वरु
णंआवा०॥तववायवृतस्पते०॥वायवे०॥वायुमावाहयामि॥सोमोधेनु०॥ ॥२॥

नुंसो०॥सोमा०॥सोमं आवा०॥तमीशानं०॥ईशानं आवा०॥स्थापया
पिर मि पूजयामि०॥ जुका प्रार्थयंगृहमागत्य देवीस्थानेरंगमाल्यादिसं
भारासंपाघदेशकालौ स्मरलामुक्ताफलादिगंधपुष्पादिकलशरमहोला
एनाकेनाकलशेहिरण्याक्षिप्तातस्योपरिअष्टदलंसंलिख्य॥अथपीठदे
वता॥पूर्वे॥ॐकारपीठायनमः॥पूर्णपीठायनमः॥कामपी०॥आग्ने
ये०॥गणेशाय०॥क्षेत्रपाला०॥पादुकाध्यानं०॥बहुरकेध्यानं०॥पूर्वे॥वि दु६
घ्नुमायायै०॥चेतनायै०॥बुध्यै०॥निद्रायै०॥दक्षिणेजयायै०॥शांत्यै०॥
लक्ष्म्यै०॥तृष्णायै०॥लज्जायै०॥पश्चिमेशांत्यै०॥श्रद्धायै०॥क्रियायै०॥लक्ष्म्यै
०॥रत्यै०॥प्रीत्यै०॥उत्तरे०॥सत्यै०॥तुष्ट्यै०॥मात्रे०॥श्रीसि०॥चतु एता

॥३॥

॥३॥ विंशद्दलनागष्टदले स्थापयेत् ॥ पीठस्य मध्यभागे ॥ आधारशक्त्यै ० ॥ कूर्माय ० ॥ शेषाय ० ॥
पृथिव्यै ० ॥ नाला... ॥ पद्माय ० ॥ पुनरष्टदले ॥ ब्राह्म्यै ० ॥ हंसवाहिन्यै ० ॥ माहेश्वर्यै ० ॥ वृषारू
ढा ० ॥ कौमार्यै ० ॥ मयूरवाहि ० ॥ वैष्णव्यै ० ॥ गरुडवाहिन्यै ० ॥ वराहदंष्ट्रोद्धृतवसुंधरायै ० ॥ नारसिं ० ॥
नारायिण्यै ० ॥ ऐंद्र्यै ० ॥ गजारूढा ० ॥ रुद्रगणेशमायायै ० ॥ चामुंडायै ० ॥ मुंडमंडितायै ० ॥
कलिमध्ये ॥ ब्रह्मण्यायै ० ॥ नतनंदजायै ० ॥ हेमगर्भा ० ॥ सुरूपायै ० ॥ स्कंदंता ० ॥
रत्नकंचायै ० ॥ नीलायै ० ॥ शिरोरत्ना ० ॥ ततो मंडलदुर्घर्षा ० ॥ नामर्यै ० ॥ व
स्त्रायै ॥ विनतायै ॥ पूर्व...मबीजमहा...यै ० ॥ द्वितीये ॥ महालक्ष्म्यै ० ॥ तृतीती
ये ॥ महासरस्वत्यै ॥ सिंहासनमध्ये ० ॥ ललितादेव्यै ० ॥ इति पीठार्चनं ॥ सर्वोह ॥३॥
षादिके सौम्ये लोकलज्जानिवारणे ॥ मयोपपादिते तुभ्यं वाससी प्रतिगृ २
ह्यतां ॥ वस्त्रं ० ॥ आदिसवर्णे तपसो ० ॥ वस्त्रं ॥ मुक्तामणिगणास्फार ३३

॥३॥

स्फुरत्कंचुकीमिमां ॥ पीतांबरं चोत्तरीयं गृहाण जगदंबिके ॥ कंचुकं ॥ तैलं कुं
मिश्रितं चैव रंजनीचूर्णसंभवं ॥ त्वदर्थं च मया दत्तं कराग्रेण विलेपयेत् ॥
हरिद्रां ॥ सौभाग्यादिचयलिंचितं सर्वदेहिमशिवे ॥ नेत्रांबुजानिहरणं
क ऊलं प्रति गृह्यतां ॥ कज्जलं ॥ कंठसूत्रं ताडपत्रं हरिद्रां कुंकुमांजनं ॥ सि
दूरादि प्रदास्यामि सौभाग्यं देहि मेव्ययं ॥ सौभाग्यद्रव्याणि ॥ मलय
चरसंभूतं चंदनं सारमनोहरं ॥ हृदयानंदनं चारु च ० ॥ तस्मात्प्रत्ता
सर्वहुतं च ःसा ० ॥ क्षुत्पिपासामला ० ॥ गंधं ॥ मालतीकेतकीज
तीजाती चंपकं मल्लिकां ॥ मा...याहृतानि पूजार्थं पुष्पाणि ० ॥ तस्माद
त्वा ० ॥ गंधद्वारां ० ॥ पुष्पं ॥ अथांगपूजा ॥ उपांगललितायै ० ॥ पादौ
पूजयामि ॥ कात्यायिन्यै ० ॥ गुल्फौ पूजयामि ॥ सावित्र्यै ० ॥ जानुनी ० ॥

दु०लि०पू०

॥४॥ सरस्वत्यै०॥ जंघो०॥ भद्रकाल्यै०॥ कटिं पू०॥ मंगला०॥ नाभिं०॥ शिवायै०॥ उदरं०॥
धात्र्यै०॥ हृदयं०॥ विश्वरूपिण्यै०॥ बाहु पूज०॥ धात्र्यै०॥ हस्तो पूजयामि॥ स्वधा
यै०॥ कंठं पूज०॥ महारूपायै०॥ मुखं पू०॥ नारायिण्यै०॥ नासिकं पूजयेम॥ या
रौद्रमुख्यै०॥ श्रोत्रं पू०॥ कुमार्यै०॥ ललाटं०॥ श्री अपांगललितायै०॥ सर्वा
गं पूजयामि॥ अथ अष्टोत्तरशतनामानि॥ ॐ रोहिण्यै०॥ माहेश्वर्यै०॥ वि
द्यायै०॥ जयायै०॥ मात्रे०॥ महालक्ष्म नमः॥ विष्णुमायायै०॥ शिवायै०॥ शां
तायै०॥ सिद्ध्यै०॥ सरस्वत्यै०॥ क्षमायै०॥ कात्यायिन्यै०॥ भुवनायै०॥ ज्योत्स्नायै०॥ रामा
पार्वत्यै०॥ विश्वमंगलायै०॥ हिंगुलायै०॥ चंडिकायै०॥ दातायै०॥ प्रीत्यै० ॥४॥
त्रिपुरायै०॥ निंदिन्यै०॥ नंदायै०॥ सुखंदितायै०॥ यज्ञविद्या०॥ महामायायै०॥

देवमात्रेन०॥ शुच्यै०॥ धृत्यै०॥ प्रीत्यै०॥ प्रियायै०॥ प्रसिद्धायै०॥ मृडायै०॥
विंध्यवासिन्यै०॥ सिद्धायै०॥ विद्यायै०॥ महा०॥ पृथि०॥ नक्षत्रतायै०॥
पुरुहूतप्रिया०॥ कांत्यै०॥ मलिन्यै०॥ पद्मलोचनायै०॥ प्रसादिन्यै०॥
महिषासुरमर्दिन्यै०॥ दुर्गायै०॥ दुर्गतिनाशिन्यै०॥ ज्वालामुख्यै०॥
कपिलायै०॥ प०॥ कृष्णपिंगलायै०॥ भद्रकाल्यै०॥ महाकाल्यै०॥
जातिकुमुदवासिन्यै०॥ सरस्वत्यै०॥ पुरवासिन्यै०॥ अपर्णायै०॥
भ्रामर्यै०॥ इंद्रवंदितायै०॥ मृडुवावासिन्यै०॥ नारायिण्यै०॥
निद्रायै०॥ योगनिद्रायै०॥ प्रज्ञायै०॥ परिमितायै०॥ लक्ष्म्यै०॥
धर्मायै०॥ क्षिरार्णवनायै०॥ भुंसविनाशिन्यै०॥ कमहाधा महधा

रिण्यै०॥ब्रह्मांड धारिण्यै०॥ब्रह्मां वासिन्यै०॥ब्रह्मांड मोहिन्यै०॥
मन्मथ वासिन्यै०॥प्रतिविग्रायै०॥त्रिपुर सुंदर्यै०॥मायायै०॥त्रैलो
क्यत्तायै०॥ चंद्रमंडितायै०॥मृत्युंजयायै०॥हंसवाहिन्यै०॥ल
लितायै०॥जगदंबिकायै०॥गौर्यै०॥वरदायै०॥श्रियायै०॥
कालरात्र्यै०॥भक्तवत्सलायै०॥धात्र्यै०॥ब्रह्मांण्यै०॥ ९०॥म
नोरथदायिन्यै०॥शुभायै०॥मधुकैटभमर्दिन्यै०॥शिवप्रियायै०॥स्कं
दमात्रेनमः०॥शांत्यै०॥हिमाचलसुतायै०॥[illegible]यिण्यै०॥लक्ष्म्यै
०॥महाकाल्यै०॥१००॥ सरस्वत्यै०॥विश्ववल्लभायै०॥ शांकर्यै०॥
अनघायै०॥भवभयनाशिन्यै०॥विश्वमात्रे०॥विश्वमात्रे०॥ ॥५॥

कैलासवासिन्यै०॥श्रीउपांगललितादेव्यै०॥१००८॥देवद्रुमनसोद्भूतो
कालागरुसमन्वितः॥आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यतां॥
यतुरूपं०॥मनसः काममा०॥धूपं॥चक्षुर्दं सर्वलोकानां तिमिरस्यनि
वारणं॥आर्तिक्यं कल्पितं भक्त्या गृहाण परमेश्वरी॥ब्राह्मणोस्य मु
०॥कर्दमेन प्रजा भु०॥मोदकान्पूपलड्डूकान्वटकोडुंबरादि[illegible]मिः॥स
तं पायसिन्नीन्नं नैवेद्यं प्रतिगृह्यतां॥ चंद्रमामनः०॥आपः सृजंतु स्नि
०॥नैवेद्यं॥करवसककैसरं देवी चंदनं मलयोद्भवं॥उभयेषां नयेदास्ये क
रोद्वर्तनकरिविं॥करोद्वर्तनं॥कर्पूरेलासमायुक्तं तांबुलं प्रतिगृह्यतां॥
कर्पूरिकाकंगेश्च तांबुलिदलसंयुतं॥मयोपपादितं तुभ्यं तांबुलं प्रति
गृह्यतां॥तांबुलं॥इत्फकं मयोदत्तं०॥हिरण्यगर्भगर्भं०॥हृत्रयंदत्तीमं

०लि०पू०

॥९॥

त्रा:॥ बहुप्ररोहा सततम मृताहरिता लिका॥ पथेयं ललिते माता स्त
था मे सुमनोरथा:॥ इति दूर्वामंत्र:॥ नाम्ना आसि०॥ अक्षरद्वीप०॥
अंजलिपुष्पं॥ चक्षुर्दं सर्वलोकानां०॥ मंगलार्तिक्यं०॥ ससास्यान्प०॥
६८ तां मया वज्रा०॥ प्रदक्षिणां॥ पानिका०॥ नमस्तुभ्यं जगद्धात्री भक्ता
नां हितकारिणी॥ जगद्धितिविनाशिन्यै सर्वमंगलमूर्तये॥ नमस्का
रा:॥ अथ प्रार्थना॥ पुत्रां देहि धनं देहि सौभाग्यमेव च॥ अवैधव्यं च मे
देहि सर्वान्कामांश्च देहि मे॥१॥ सापराधोस्मि शरणं प्राप्तस्त्वां जगद
म्बिके॥ इदानीमनुकंप्योहं यदिच्छसि कुरुष्व तत्॥ इति प्रार्थना॥
ब्राह्मणपूजनं॥ उपांगललितारव्याव्रतसंपूर्णहितवे॥ ॥९॥

वाणकं द्विजवर्याय सहिरण्यं ददाम्यहं॥ इति वायनमंत्र:॥ अ
थ विसर्जनं॥ सवाहना शक्तियुता वरदा पूजिता मया
॥ मातर्मामनुगृह्याशु गम्यतां निजमंदिरं॥ इति विसर्जनं
॥ अथ पूजाविधि:॥ रामू॥ ॥ शके॥१६८७ पार्थिवनाम
संवत्सरे कार्तिक वद्य चतुर्थी भृगुवासरे तं दिनी स
पक्षक रोपनामदामोदरेन लिखितं॥ स्वार्थं परार्थं॥
पारंरां पुस्तकं दृष्ट्वा तादृशं लिखितं मया॥ यदि शुद्धमशु॥

16

॥ इति पिंगल लिलाभ्रज्ञा समाप्तः ॥